# ॥ वाल्मीकि रामायण॥

## ४ किष्किन्धाकाण्ड

### अध्याय ६२

एतैरन्यैश्च बहुभिर्वाक्यैर्वाक्यविशारदः ।
मां प्रशस्याभ्यनुज्ञाप्य प्रविष्टः स स्वमाश्रमम् ॥ १॥

कन्दरात्तु विसर्पित्वा पर्वतस्य शनैः शनैः ।
अहं विन्ध्यं समारुह्य भवतः प्रतिपालये ॥ २॥

अद्य त्वेतस्य कालस्य साग्रं वर्षशतं गतम् ।
देशकालप्रतीक्षोऽस्मि हृदि कृत्वा मुनेर्वचः ॥ ३॥

महाप्रस्थानमासाद्य स्वर्गते तु निशाकरे ।
मां निर्दहति सन्तापो वितर्कैर्बहुभिर्वृतम् ॥ ४॥

उत्थितां मरणे बुद्धिं मुनि वाक्यैर्निवर्तये ।
बुद्धिर्या तेन मे दत्ता प्राणसंरक्षणाय तु ।
सा मेऽपनयते दुःखं दीप्तेवाग्निशिखा तमः ॥ ५॥

बुध्यता च मया वीर्यं रावणस्य दुरात्मनः ।
पुत्रः सन्तर्जितो वाग्भिर्न त्राता मैथिली कथम् ॥ ६॥

तस्या विलपितं श्रुत्वा तौ च सीता विनाकृतौ ।
न मे दशरथस्नेहात्पुत्रेणोत्पादितं प्रियम् ॥ ७॥

तस्य त्वेवं ब्रुवाणस्य सम्पातेर्वानरैः सह ।
उत्पेततुस्तदा पक्षौ समक्षं वनचारिणाम् ॥ ८॥

स दृष्ट्वा स्वां तनुं पक्षैरुद्गतैररुणच्छदैः ।
प्रहर्षमतुलं लेभे वानरांश्चेदमब्रवीत् ॥ ९॥

निशाकरस्य महर्षेः प्रभावादमितात्मनः ।
आदित्यरश्मिनिर्दग्धौ पक्षौ मे पुनरुत्थितौ ॥ १०॥

यौवने वर्तमानस्य ममासीद्यः पराक्रमः ।
तमेवाद्यावगच्छामि बलं पौरुषमेव च ॥ ११॥

सर्वथा क्रियतां यत्नः सीतामधिगमिष्यथ ।
पक्षलाभो ममायं वः सिद्धिप्रत्यय कारकः ॥ १२॥

इत्युक्त्वा तान्हरीन्सर्वान्सम्पातिः पततां वरः ।
उत्पपात गिरेः शृङ्गाज्जिज्ञासुः खगमो गतिम् ॥ १३॥

तस्य तद्वचनं श्रुत्वा प्रीतिसंहृष्टमानसाः ।
बभूवुर्हरिशार्दूला विक्रमाभ्युदयोन्मुखाः ॥ १४॥

अथ पवनसमानविक्रमाः
प्लवगवराः प्रतिलब्ध पौरुषाः ।
अभिजिदभिमुखां दिशं ययुर्
जनकसुता परिमार्गणोन्मुखाः ॥ १५॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com